# સ્તોત્રરત્નં અથવા આલવન્દારસ્તોત્રમ્

Stotraratnam or Alavandarastotram

sanskritdocuments.org

February 21, 2018

# Stotraratnam or Alavandarastotram

# સ્તોત્રરત્નં અથવા આલવન્દારસ્તોત્રમ્

## Sanskrit Document Information

Text title : stotraratnam athavA AlavandArastotram

File name : stotraratnaAlavandAra.itx

Category : vishhnu, krishna, vishnu, yAmunAchArya

Location : doc_vishhnu

Author : yAmunachArya

Transliterated by : Rajnarayanan C K krajnara at gmail.com

Proofread by : Rajnarayanan C K krajnara at gmail.com, PSA Easwaran

Latest update : February 21, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

February 21, 2018

*sanskritdocuments.org*

# સ્તોત્રરત્નં અથવા આલવન્દારસ્તોત્રમ્

સ્વાદયન્નિહ સર્વેષાં ત્રય્યન્તાર્થં સુદુર્ગ્રહમ્ ।
સ્તોત્રયામાસ યોગીન્દ્રસ્તં વન્દે યામુનાહ્વયમ્ ॥

નમો નમો યામુનાય યામુનાય નમો નમઃ ।
નમો નમો યામુનાય યામુનાય નમો નમઃ ॥

નમો યામુનપાદાબ્જરેણુભિઃ પાવિતાત્મને ।
વિદિતાખિલ વેદ્યાય ગુરવે વિદિતાત્મને ॥

નમોઽચિન્ત્યાદ્ભુતાક્લિષ્ટ જ્ઞાનવૈરાગ્યરાશયે ।
નાથાય મુનયેઽગાધભગવદ્ભક્તિસિન્ધવે ॥ ૧॥

તસ્મૈ નમો મધુજિદઙ્ઘ્રિસરોજતત્ત્વજ્ઞાનાનુરાગમહિમાતિશયાન્તસીમ્ને ।
નાથાય નાથમુનયેઽત્ર પરત્ર ચાપિ નિત્યં યદીયચરણૌ શરણં મદીયમ્ ॥ ૨॥

ભૂયો નમોઽપરિમિતાચ્યુતભક્તિતત્ત્વ-
જ્ઞાનામૃતાબ્ધિપરિવાહશુભૈર્વચોભિઃ ।
લોકેઽવતીર્ણપરમાર્થસમગ્રભક્તિ-
યોગાય નાથમુનયે યમિનાં વરાય ॥ ૩॥

તત્ત્વેન યશ્ચિદચિદીશ્વરતત્સ્વભાવભોગાપવર્ગતદુપાયગતીરુદારઃ ।
સન્દર્શયન્નિરમમીત પુરાણરત્નં તસ્મૈ નમો મુનિવરાય પરાશરાય ॥ ૪॥

માતા પિતા યુવતયસ્તનયા વિભૂતિસ્સર્વં યદેવ નિયમેન મદન્વયાનામ્ ।
આદ્યસ્ય નઃ કુલપતેર્વકુલાભિરામં શ્રીમત્તદઙ્ઘ્રિયુગલં પ્રણમામિ મૂર્ધ્ના ॥ ૫॥

યન્મૂર્ધ્નિ મે શ્રુતિશિરસ્સુ ચ ભાતિ યસ્મિ-
ન્નસ્મન્મનોરથપથસ્સકલસ્સમેતિ ।
સ્તોષ્યામિ નઃ કુલધનં કુલદૈવતં ત-
ત્પાદારવિન્દમરવિન્દવિલોચનસ્ય ॥ ૬॥

તત્ત્વેન યસ્ય મહિમાર્ણવશીકરાણુ-
શ્શક્યો ન માતુમપિ શર્વપિતામહાદ્યૈઃ ।
કર્તું તદીયમહિમસ્તુતિમુદ્યતાય
મહ્યં નમોઽસ્તુ કવયે નિરપત્રપાય ॥ ૭॥

યદ્વા શ્રમાવધિ યથામતિ વાપ્યશક્ત-
સ્સ્તૌમ્યેવમેવ ખલુ તેઽપિ સદા સ્તુવન્તઃ ।
વેદાશ્ચતુર્મુખમુખાશ્ચ મહાર્ણવાન્તઃ
કો મજ્જતોરણુકુલાચલયોર્વિશેષઃ ॥ ૮॥

કિઞ્ચૈષ શક્ત્યતિશયેન ન તેઽનુકમ્પ્ય-
સ્સ્તોતાપિ તુ સ્તુતિકૃતેન પરિશ્રમેણ ।
તત્ર શ્રમસ્તુ સુલભો મમ મન્દબુદ્ધે-
રિત્યુદ્યમોઽયમુચિતો મમ ચાબ્જનેત્ર ॥ ૯॥

નાવેક્ષસે યદિ તતો ભુવનાન્યમૂનિ
નાલં પ્રભો ભવિતુમેવ કુતઃ પ્રવૃત્તિઃ ।
એવં નિસર્ગસુહૃદિ ત્વયિ સર્વજન્તો-
સ્સ્વામિન્વિચિત્રમિદમાશ્રિતવત્સલત્વમ્ ॥ ૧૦॥

સ્વાભાવિકાનવધિકાતિશયેશિતૃત્વં
નારાયણ ત્વયિ ન મૃષ્યતિ વૈદિકઃ કઃ ।
બ્રહ્મા શિવશ્શતમખઃ પરમસ્વરાડિ-
ત્યેતેઽપિ યસ્ય મહિમાર્ણવવિપ્રુષસ્તે ॥ ૧૧॥

કશ્શ્રીશ્શ્રિયઃ પરમસત્ત્વસમાશ્રયઃ કઃ
કઃ પુણ્ડરીકનયનઃ પુરુષોત્તમઃ કઃ ।
કસ્યાયુતાયુતશતૈકકલાંશકાંશે
વિશ્વં વિચિત્રચિદચિત્પ્રવિભાગવૃત્તમ્ ॥ ૧૨॥

વેદાપહારગુરુપાતકદૈત્યપીડા-
દ્યાપદ્વિમોચનમહિષ્ઠફલપ્રદાનૈઃ ।
કોઽન્યઃ પ્રજાપશુપતી પરિપાતિ કસ્ય
પાદોદકેન સ શિવસ્સ્વશિરોધૃતેન ॥ ૧૩॥

કસ્યોદરે હરવિરિઞ્ચિમુખઃ પ્રપઞ્ચઃ
કો રક્ષતીમમજનિષ્ટ ચ કસ્ય નાભેઃ ।

ક્રાન્ત્વા નિગીર્ય પુનરુદ્ગિરતિ ત્વદન્યઃ
કઃ કેન વૈષ પરવાનિતિ શક્યશઙ્કઃ ॥ ૧૪॥

ત્વાં શીલરૂપચરિતૈઃ પરમપ્રકૃષ્ટ-
સત્ત્વેન સાત્ત્વિકતયા પ્રબલૈશ્ચ શાસ્ત્રૈઃ ।
પ્રખ્યાતદૈવપરમાર્થવિદાં મતૈશ્ચ
નૈવાસુરપ્રકૃતયઃ પ્રભવન્તિ બોદ્ધુમ્ ॥ ૧૫॥

ઉલ્લઙ્ઘિતત્રિવિધસીમસમાતિશાયિ-
સમ્ભાવનં તવ પરિવ્રઢિમસ્વભાવમ્ ।
માયાબલેન ભવતાઽપિ નિગૂહ્યમાનં
પશ્યન્તિ કેચિદનિશં ત્વદનન્યભાવાઃ ॥ ૧૬॥

યદણ્ડમણ્ડાન્તરગોચરં ચ યદ્દશોત્તરાણ્યાવરણાનિ યાનિ ચ ।
ગુણાઃ પ્રધાનં પુરુષઃ પરમ્પદં પરાત્પરં બ્રહ્મ ચ તે વિભૂતયઃ ॥ ૧૭॥

વશી વદાન્યો ગુણવાનૃજુશ્શુચિર્મૃદુર્દયાલુર્મધુરસ્સ્થિરસ્સમઃ ।
કૃતી કૃતજ્ઞસ્ત્વમસિ સ્વભાવતસ્સમસ્તકલ્યાણગુણામૃતોદધિઃ ॥ ૧૮॥

ઉપર્યુપર્યબ્જભુવોઽપિ પૂરુષાન્પ્રકલ્પ્ય તે યે શતમિત્યનુક્રમાત્ ।
ગિરસ્ત્વદેકૈકગુણાવધીપ્સયા સદાસ્થિતા નોદ્યમતોઽતિશેરતે ॥ ૧૯॥

ત્વદાશ્રિતાનાં જગદુદ્ભવસ્થિતિપ્રણાશસંસારવિમોચનાદયઃ ।
ભવન્તિ લીલાવિધયશ્ચ વૈદિકાસ્ત્વદીયગમ્ભીરમનોઽનુસારિણઃ ॥ ૨૦॥

નમો નમો વાઙ્મનસાતિભૂમયે નમો નમો વાઙ્મનસૈકભૂમયે ।
નમો નમોઽનન્તમહાવિભૂતયે નમો નમોઽનન્તદયૈકસિન્ધવે ॥ ૨૧॥

ન ધર્મનિષ્ઠોઽસ્મિ ન ચાત્મવેદી ન ભક્તિમાંસ્ત્વચ્ચરણારવિન્દે ।
અકિઞ્ચનોઽનન્યગતિશ્શરણ્ય ત્વત્પાદમૂલં શરણં પ્રપદ્યે ॥ ૨૨॥

ન નિન્દિતં કર્મ તદસ્તિ લોકે સહસ્રશો યન્ન મયા વ્યધાયિ ।
સોઽહં વિપાકાવસરે મુકુન્દ ક્રન્દામિ સમ્પ્રત્યગતિસ્તવાગ્રે ॥ ૨૩॥

નિમજ્જતોઽનન્તભવાર્ણવાન્તશ્ચિરાય મે કૂલમિવાસિ લબ્ધઃ ।
ત્વયાપિ લબ્ધં ભગવન્નિદાનીમનુત્તમં પાત્રમિદં દયાયાઃ ॥ ૨૪॥

અભૂતપૂર્વં મમ ભાવિ કિં વા સર્વં સહે મે સહજં હિ દુઃખમ્ ।
કિન્તુ ત્વદગ્રે શરણાગતાનાં પરાભવો નાથ ન તેઽનુરૂપઃ ॥ ૨૫॥

નિરાસકસ્યાપિ ન તાવદુત્સહે મહેશ હાતું તવ પાદપઙ્કજમ્ ।
રુષા નિરસ્તોઽપિ શિશુસ્સ્તનન્ધયો ન જાતુ માતુશ્ચરણૌ જિહાસતિ ॥ ૨૬॥

તવામૃતસ્યન્દિનિ પાદપઙ્કજે નિવેશિતાત્મા કથમન્યદિચ્છતિ ।
સ્થિતેઽરવિન્દે મકરન્દનિર્ભરે મધુવ્રતો નેક્ષુરકં હિ વીક્ષતે ॥ ૨૭॥

ત્વદઙ્ઘ્રિમુદ્દિશ્ય કદાપિ કેનચિદ્યથા તથા વાઽપિ સકૃત્કૃતોઽઞ્જલિઃ ।
તદૈવ મુષ્ણાત્યશુભાન્યશેષતશ્શુભાનિ પુષ્ણાતિ ન જાતુ હીયતે ॥ ૨૮॥

ઉદીર્ણસંસારદવાશુશુક્ષણિં ક્ષણેન નિર્વાપ્ય પરાં ચ નિર્વૃતિમ્ ।
પ્રયચ્છતિ ત્વચ્ચરણારુણામ્બુજદ્વયાનુરાગામૃતસિન્ધુશીકરઃ ॥ ૨૯॥

વિલાસવિક્રાન્તપરાવરાલયં નમસ્યદાર્તિક્ષપણે કૃતક્ષણમ્ ।
ધનં મદીયં તવ પાદપઙ્કજં કદા નુ સાક્ષાત્કરવાણિ ચક્ષુષા ॥ ૩૦॥

કદા પુનશ્શઙ્ખરથાઙ્ગકલ્પકધ્વજારવિન્દાઙ્કુશવજ્રલાઞ્છનમ્ ।
ત્રિવિક્રમ ત્વચ્ચરણામ્બુજદ્વયં મદીયમૂર્ધાનમલઙ્કરિષ્યતિ ॥ ૩૧॥

વિરાજમાનોજ્જ્વલપીતવાસસં સ્મિતાતસીસૂનસમામલચ્છવિમ્ ।
નિમગ્નનાભિં તનુમધ્યમુન્નતં વિશાલવક્ષસ્સ્થલશોભિલક્ષણમ્ ॥ ૩૨॥

ચકાસતં જ્યાકિણકર્કશૈશ્શુભૈશ્ચતુર્ભિરાજાનુવિલમ્બિભિર્ભુજૈઃ ।
પ્રિયાવતંસોત્પલકર્ણભૂષણશ્લથાલકાબન્ધવિમર્દશંસિભિઃ ॥ ૩૩॥

ઉદગ્રપીનાંસવિલમ્બિકુણ્ડલાલકાવલીબન્ધુરકમ્બુકન્ધરમ્ ।
મુખશ્રિયા ન્યક્કૃતપૂર્ણનિર્મલામૃતાંશુબિમ્બામ્બુરુહોજ્જ્વલશ્રિયમ્ ॥ ૩૪॥

પ્રબુદ્ધમુગ્ધામ્બુજચારુલોચનં સવિભ્રમભ્રૂલતમુજ્જ્વલાધરમ્ ।
શુચિસ્મિતં કોમલગણ્ડમુન્નસં લલાટપર્યન્તવિલમ્બિતાલકમ્ ॥ ૩૫॥

સ્ફુરત્કિરીટાઙ્ગદહારકણ્ઠિકામણીન્દ્રકાઞ્ચીગુણનૂપુરાદિભિઃ ।
રથાઙ્ગશઙ્ખાસિગદાધનુર્વરૈર્લસત્તુલસ્યાવનમાલયોજ્જ્વલમ્ ॥ ૩૬॥

ચકર્થ યસ્યા ભવનં ભુજાન્તરં તવ પ્રિયં ધામ યદીયજન્મભૂઃ ।
જગત્સમસ્તં યદપાઙ્ગસંશ્રયં યદર્થમમ્ભોધિરમન્થ્યબન્ધિ ચ ॥ ૩૭॥

સ્વવૈશ્વરૂપ્યેણ સદાઽનુભૂતયાપ્યપૂર્વવદ્વિસ્મયમાદધાનયા ।
ગુણેન રૂપેણ વિલાસચેષ્ટિતૈસ્સદા તવૈવોચિતયા તવ શ્રિયા ॥ ૩૮॥

તયા સહાસીનમનન્તભોગિનિ પ્રકૃષ્ટવિજ્ઞાનબલૈકધામનિ ।
ફણામણિવ્રાતમયૂખમણ્ડલપ્રકાશમાનોદરદિવ્યધામનિ ॥ ૩૯॥

નિવાસશય્યાસનપાદુકાંશુકોપધાનવર્ષાતપવારણાદિભિઃ ।
શરીરભેદૈસ્તવ શેષતાં ગતૈર્યથોચિતં શેષ ઇતીર્યતે જનૈઃ ॥ ૪૦ ॥

દાસસ્સખા વાહનમાસનં ધ્વજો યસ્તે વિતાનં વ્યજનં ત્રયીમયઃ ।
ઉપસ્થિતં તેન પુરો ગરુત્મતા ત્વદઙ્ઘ્રિસમ્મર્દકિણાઙ્કશોભિના ॥ ૪૧ ॥

var ત્વદઙ્ઘ્રિસંસ્પર્શસુખૈકકામિના
ત્વદીયભુક્તોજ્ઝિતશેષભોજિના ત્વયા નિવૃષ્ટાત્મભરેણ યદ્યથા ।
પ્રિયેણ સેનાપતિના ન્યવેદિ તત્તથાઽનુજાનન્તમુદારવીક્ષણૈઃ ॥ ૪૨ ॥

હતાખિલક્લેશમલૈસ્સ્વભાવતસ્સદાનુકૂલ્યૈકરસૈસ્તવોચિતૈઃ ।
ગૃહીતતત્તત્પરિચારસાધનૈર્નિષેવ્યમાણં સચિવૈર્યથોચિતમ્ ॥ ૪૩ ॥

અપૂર્વનાનારસભાવનિર્ભરપ્રબદ્ધયા મુગ્ધવિદગ્ધલીલયા ।
ક્ષણાણુવત્ક્ષિપ્તપરાદિકાલયા પ્રહર્ષયન્તં મહિષીં મહાભુજમ્ ॥ ૪૪ ॥

અચિન્ત્યદિવ્યાદ્ભુતનિત્યયૌવનસ્વભાવલાવણ્યમયામૃતોદધિમ્ ।
શ્રિયશ્શ્રિયં ભક્તજનૈકજીવિતં સમર્થમાપત્સખમર્થિકલ્પકમ્ ॥ ૪૫ ॥

ભવન્તમેવાનુચરન્નિરન્તરપ્રશાન્તનિશ્શેષમનોરથાન્તરઃ ।
કદાહમૈકાન્તિકનિત્યકિઙ્કરઃ પ્રહર્ષયિષ્યામિ સનાથજીવિતઃ ॥ ૪૬ ॥

ધિગશુચિમવિનીતં નિર્દયં મામલજ્જં
પરમપુરુષ યોઽહં યોગિવર્યાગ્રગણ્યૈઃ ।
વિધિશિવસનકાદ્યૈર્ધ્યાતુમત્યન્તદૂરં
તવ પરિજનભાવં કામયે કામવૃત્તઃ ॥ ૪૭ ॥

અપરાધસહસ્રભાજનં પતિતં ભીમભવાર્ણવોદરે ।
અગતિં શરણાગતં હરે કૃપયા કેવલમાત્મસાત્કુરુ ॥ ૪૮ ॥

અવિવેકઘનાન્ધદિઙ્મુખે બહુધા સન્તતદુઃખવર્ષિણિ ।
ભગવન્ભવદુર્દિને પથસ્ખલિતં મામવલોકયાચ્યુત ॥ ૪૯ ॥

ન મૃષા પરમાર્થમેવ મે શૃણુ વિજ્ઞાપનમેકમગ્રતઃ ।
યદિ મે ન દયિષ્યસે તતો દયનીયસ્તવ નાથ દુર્લભઃ ॥ ૫૦ ॥

તદહં ત્વદૃતે ન નાથવાન્મદૃતે ત્વં દયનીયવાન્ન ચ ।
વિધિનિર્મિતમેતદન્યં ભગવન્પાલય મા સ્મ જૈહ્મ્યયા ॥ ૫૧ ॥

વપુરાદિષુ યોઽપિ કોઽપિ વા ગુણતોઽસાનિ યથાતથાવિધઃ ।
તદયં તવ પાદપદ્મયોરહમદ્યૈવ મયા સમર્પિતઃ ॥ ૫૨॥

મમ નાથ યદસ્તિ યોઽસ્મ્યહં સકલં તદ્ધિ તવૈવ માધવ ।
નિયતસ્વમિતિ પ્રબુદ્ધધીરથવા કિન્નુ સમર્પયામિ તે ॥ ૫૩॥

અવબોધિતવાનિમાં યથા મયિ નિત્યાં ભવદીયતાં સ્વયમ્ ।
કૃપયૈવમનન્યભોગ્યતાં ભગવન્ભક્તિમપિ પ્રયચ્છ મે ॥ ૫૪॥

તવદાસ્યસુખૈકસઙ્ગિનાં ભવનેષ્વસ્ત્વપિ કીટજન્મ મે ।
ઇતરાવસથેષુ માસ્મ ભૂદપિ મે જન્મ ચતુર્મુખાત્મના ॥ ૫૫॥

સકૃત્ત્વદાકારવિલોકનાશયા તૃણીકૃતાનુત્તમભુક્તિમુક્તિભિઃ ।
મહાત્મભિર્મામવલોક્યતાં નય ક્ષણેઽપિ તે યદ્વિરહોઽતિદુસ્સહઃ ॥ ૫૬॥

ન દેહં ન પ્રાણાન્ન ચ સુખમશેષાભિલષિતં
ન ચાત્માનં નાન્યત્કિમપિ તવ શેષત્વવિભવાત્ ।
બહિર્ભૂતં નાથ ક્ષણમપિ સહે યાતુ શતથા
વિનાશં તત્સત્યં મધુમથન વિજ્ઞાપનમિદમ્ ॥ ૫૭॥

દુરન્તસ્યાનાદેરપરિહરણીયસ્ય મહતો
વિહીનાચારોઽહં નૃપશુરશુભસ્યાસ્પદમપિ ।
દયાસિન્ધો બન્ધો નિરવધિકવાત્સલ્યજલધે ।
તવ સ્મારં સ્મારં ગુણગણમિતીચ્છામિ ગતભીઃ ॥ ૫૮॥

અનિચ્છન્નપ્યેવં યદિ પુનરિતીચ્છન્નિવ રજ-
સ્તમશ્છન્નચ્છદ્મસ્તુતિવચનભઙ્ગીમરચયમ્ ।
તથાપીત્થં રૂપં વચનમવલમ્બ્યાપિ કૃપયા
ત્વમેવૈવં ભૂતં ધરણિધર મે શિક્ષય મનઃ ॥ ૫૯॥

પિતા ત્વં માતા ત્વં દયિત તનયસ્ત્વં પ્રિયસુહૃ-
ત્ત્વમેવ ત્વં મિત્રં ગુરુરસિ ગતિશ્ચાસિ જગતામ્ ।
ત્વદીયસ્ત્વદ્ભૃત્યસ્તવ પરિજનસ્ત્વદ્ગતિરહં
પ્રપન્નશ્ચૈવં સત્યહમપિ તવૈવાસ્મિ હિ ભરઃ ॥ ૬૦॥

જનિત્વાઽહં વંશે મહતિ જગતિ ખ્યાતયશસાં
શુચીનાં યુક્તાનાં ગુણપુરુષતત્ત્વસ્થિતિવિદામ્ ।
નિસર્ગાદેવ ત્વચ્ચરણકમલૈકાન્તમનસા-

મઘોઘઃ પાપાત્મા શરણદ નિમજ્જામિ તમસિ ॥ ૬૧॥

અમર્યાદઃ ક્ષુદ્રશ્ચલમતિરસૂયાપ્રસવભૂઃ
કૃતઘ્નો દુર્માની સ્મરપરવશો વઞ્ચનપરઃ ।
નૃશંસઃ પાપિષ્ટઃ કથમહમિતો દુઃખજલધે-
રપારાદુત્તીર્ણસ્તવ પરિચરેયં ચરણયોઃ ॥ ૬૨॥

રઘુવર યદભૂસ્ત્વં તાદૃશો વાયસસ્ય
પ્રણત ઇતિ દયાલુર્યચ્ચ ચૈદ્યસ્ય કૃષ્ણઃ ।
પ્રતિભવમપરાદ્ધુર્મુગ્ધસાયુજ્યદોઽભૂ-
ર્વદ કિમપદમાગસ્તસ્ય તેઽસ્તિ ક્ષમાયાઃ ॥ ૬૩॥

નનુ પ્રપન્નસ્સકૃદેવ નાથ તવાહમસ્મીતિ ચ યાચમાનઃ ।
તવાનુકમ્પ્યસ્સ્મરતઃ પ્રતિજ્ઞાં મદેકવર્જં કિમિદં વ્રતં તે ॥ ૬૪॥

અકૃત્રિમત્વચ્ચરણારવિન્દપ્રેમપ્રકર્ષાવધિમાત્મવન્તમ્ ।
પિતામહં નાથમુનિં વિલોક્ય પ્રસીદ મદ્વૃત્તમચિન્તયિત્વા ॥ ૬૫॥

યત્પાદામ્ભોરુહધ્યાનવિધ્વસ્તાશેષકલ્મષઃ ।
વસ્તુતામુપયાતોઽહં યામુનેયાં નમામિતમ્ ॥ ૬૬॥

॥ ઇતિ શ્રીમદ્યામુનમુનિવિરચિતં શ્રીઆલવન્દારસ્તોત્રરત્નં સમ્પૂર્ણમ્ ॥

Encoded by Rajnarayanan C K krajnara at gmail.com
Proofread by Rajnarayanan C K krajnara at gmail.com, PSA Easwaran

*Stotraratnam or Alavandarastotram*
pdf was typeset on February 21, 2018

Please send corrections to *sanskrit@cheerful.com*